श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणोपनिषत् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणोपनिषत् ॥

हरिः ओम्॥

अथ पुरुषो ह वै नारायणो-ऽकामयत

प्रजाः सृजेयेति।

नारायणात्-प्राणो जायते।

मनः सर्वेन्द्रि-याणि च।

खं वायु-र्ज्योति-रापः पृथिवी विश्वस्य धारिणी।

नारायणाद्-ब्रह्मा जायते।

नारायणाद्-रुद्रो जायते।

नारायणा-दिन्द्रो जायते।

नारायणात्-प्रजापतयः प्रजा-यन्ते।

नारायणाद्-द्वादशादित्या रुद्रा

वसवस्-सर्वाणि च छन्दाग्ंसि।

नारायणा-देव समुत्पद्यन्ते।

नारायणे प्रवर्तन्ते।

नारायणे प्रलीयन्ते॥

ओम्॥

अथ नित्यो ना॑राय॒णः।

ब्र॒ह्मा ना॑राय॒णः।

शि॒वश्च॑ नाराय॒णः।

श॒क्रश्च॑ नाराय॒णः।

द्या॒वा॒-पृ॒थि॒व्यौ च॑ नाराय॒णः।

का॒लश्च॑ नाराय॒णः।

दि॒शश्च॑ नाराय॒णः।

ऊ॒र्ध्वश्च॑ नाराय॒णः।

अ॒धश्च॑ नाराय॒णः।

अ॒न्त॒-र्ब॒हिश्च॑ नाराय॒णः।

नारायण एवे॑दग्ं स॒र्वम्।

यद्भू॒तं यच्च॒ भव्य᳚म्।

निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो
देव एको॑ नाराय॒णः।

न द्वि॒तीयो᳚ऽस्ति॒ कश्चि॑त्।

य ए॑वं वे॒द।

स विष्णुरेव भवति स विष्णुरे॑व भ॒वति॥

ओमित्य॑ग्रे व्या॒हरेत्।

नम इति प॒श्चात्।

ना॒रा॒य॒णायेत्-युं॑परि॒ष्टात्।

ओमिं॑त्ये-का॒क्षरम्।

नम इति॑ द्वे अ॒क्षरे।

ना॒रा॒य॒णायेति पञ्चाँ॑क्षरा॒णि।

एतद्वै नारायण-स्याष्टाक्ष॑रं प॒दम्।

यो ह वै नारायण-स्याष्टाक्षरं पदं॑-मध्ये॒ति।

अनपब्रवस्-सर्व-मा॑युरे॒ति।

विन्दते प्रां॑जा-प॒त्यगं् रायस्पोषं॑ गौप॒त्यम्।

ततो-ऽमृतत्व-मश्नुते ततो-ऽमृतत्व-मश्नुं॑त इ॒ति।

य ए॑वं वे॒द॥

प्रत्यगा-नन्दं ब्रह्म पुरुषं प्रणवं॑-स्वरू॒पम्।

अकार उकार मका॑र इ॒ति।

तानेकधा समभरत्-तदे-तं॑दो-मि॒ति।

यमुक्त्वा॑ मुच्यं॑ते यो॒गी॒ ज॒न्म॒-संसा॑र-ब॒न्धनात्।

ओं नमो नारायणा-येति मं॑न्त्रो-पा॒सकः।

वैकुण्ठ-भुवन-लोकं॑ गमि॒ष्यति।

तदिदं परं पुण्डरीकं विं॑ज्ञान॒-घनम्।

तस्मात्-तदिदा॑वन्-मा॒त्रम्।

ब्रह्मण्यो देवं॑की-पु॒त्रो॒ ब्रह्मण्यो मं॑धु-सू॒दनोम्।

सर्वभूतस्थ-मेकं॑ नारा॒यणम्।

कारण-रूप-मकार परं-ब्रह्मोम्।
एत-दथर्व शिरोयोऽधीते प्रातरंधी-यानो
रात्रि-कृतं पापं नाशयति।
सायमंधी-यानो दिवस-कृतं पापं नाशयति।
माध्यन्दिन-मादित्या-भिमुखों-ऽधीयानः
पञ्चपात-कोप-पात-कांत्प्रमुच्यते।
सर्व वेद पारायण पुंण्यं लभते।
नारायण-सायुज्य-मंवाप्नोति
नारायण-सायुज्य-मंवाप्नोति।
य एवं वेद।
इत्युंप-निषंत्॥

**॥ इति श्रीमन्नारायणोपनिषत् समाप्तम्॥**